# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा - मार्च/एप्रिल - २०२०

| | | |
|---|---|---|
| **कक्षा- शास्त्री** | **प्रश्नपत्रम् – ०७** | **गुणाः – ७०** |
| **विषयः – साहित्यम् (गौणम्)** | **सत्रम्- (२)** | **समयः- ०३ त: ०६** |
| **दिनाङ्कः – ०३/०४/२०२०** | **सन्दर्भग्रन्थः – साहित्यदर्पण:** | |

---

**प्रथमान्वितिः (Unit 1)** गुणाः

**प्रश्न १ अधोलिखितेषु कयोश्चिद् द्वयो: ससन्दर्भं व्याख्यां कुरुत ।** **१०**

१ कृतागा अपि नि:शङ्कस्तर्जितोऽपि न लज्जित: ।
दृष्टदोषोऽपि मिथ्यावाक्कथितो धृष्टनायक: ॥

२ कुरुते मण्डनं यस्या: सज्जिते वासवेश्मनि ।
सा तु वासकसज्जा स्याद्विदितप्रियसंगमा ॥

३ तस्मादलौकिक: सत्यं वेद्य: सहृदयैरयम् ।
प्रमाणं चर्वणैवात्र, स्वाभिन्ने विदुषां मतम् ॥

**प्रश्न २ करुणादीनां दु:खमयत्वात् कथं सुखोत्पत्ति: ? विवेचनं कुरुत ।** **१०**

**अथवा**

**नायकस्य भेदान् सम्यक् निरूपयतु ।**

**द्वितीयान्वितिः (Unit 2)**

**प्रश्न ३ अधोलिखितेषु कयोश्चिद् द्वयो: ससन्दर्भं व्याख्यां कुरुत ।** **१०**

१ तद्रूपा: सात्त्विका भावास्तथा चेष्टा: परा अपि ।
विकारा: सत्त्वसंभूता: सात्त्विका: परिकीर्तिता: ॥

२ शौर्यापराधादिभवं भवेच्चण्डत्वमुग्रता ।
तत्र स्वेदशिर:कम्पतर्जनाताडनादय: ॥

३ रतिर्हासश्च शोकश्च, क्रोधोत्साहौ भयं तथा ।
जुगुप्साविस्मयश्चेत्थमष्टौ प्रोक्ता: शमोऽपि च ॥

**प्रश्न ४ के व्यभिचारिण: ? सम्यक् विलिख्य विवेचनं कुरुत ।** **१०**

**अथवा**

**सामान्यनायिकानिरूपणं सप्रकारकं कुर्वन्तु ।**

## तृतीयान्वितिः (Unit 3)

**प्रश्न ५ अधोलिखितेषु कयोश्चिद् द्वयो: ससन्दर्भं व्याख्यां कुरुत ।** **१०**

१ यूनोरेकतरस्मिन्गतवति लोकान्तरं पुनर्लभ्ये ।
विमनायते यदैकस्तदा भवेत्करुणविप्रलम्भाख्य: ॥

२ उत्तमप्रकृतिर्वीर उत्साहस्थायिभावक: ।
महेन्द्रदैवतो हेमवर्णोऽयं समुदाहृत: ॥

३ साम भेदोऽथ दानं च नत्युपेक्षे रसान्तरम् ।
तद्भङ्गाय पति: कुर्यात्षडुपायानिति क्रमात् ॥

**प्रश्न ६ विप्रलम्भशृङ्गारस्य वर्णनं सोदाहरणं ग्रन्थानुसारेण लिखत ।** **१०**

**अथवा**

**साहित्यदर्पणानुसारं रसस्वरूपं सभेदोदाहरणं निरूपयत ।**

## संयुक्तान्वितय: (Unit 1-3)

**प्रश्न ७ दशानां प्रश्नानां लघूत्तराणि लिखत ।** **१०**

१ किं नाम विभावनम् ?
२ नायकस्य कति भेदा: सन्ति ?
३ दक्षिणनायकस्य किं लक्षणम् ?
४ नायकस्य दूता: कतिविधा: भवन्ति ?
५ स्वीयनायिकाया: कति भेदा: भवन्ति ?
६ परोढाया: किं लक्षणम् ?
७ कतिसंख्याका: व्यभिचारिणो भवन्ति ?
८ को नाम विप्रलम्भशृङ्गार: ?
९ तृतीयपरिच्छेदस्य प्रधानो वर्ण्यो विषय: क: ?
१० अलौकिकस्य रसस्य सद्भावे किं प्रमाणम् ?
११ विभावस्य किं लक्षणम् ?
१२ वीररसस्य देव: क: ?
१३ “शोणं वीक्ष्य मुखम्” इति कस्योदाहरणम् ?
१४ का नाम जडता ?
१५ भरतोक्तं रससूत्रं किमस्ति ?

**************************